শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদধ্যাত্মরামাযণে বালকাণ্ডে

# ॥ শ্রীরামহৃদযম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীরামহৃদযম্ ॥

ততো রামঃ স্ৱযং প্রাহ হনূমন্তমুপস্থিতম্।
শৃণু তৎৱং প্রৱক্ষ্যামি হ্যাত্মানাত্মপরাত্মনাম্॥ **1** ॥

আকাশস্য যথা ভেদস্ত্রিৱিধো দৃশ্যতে মহান্।
জলাশযে মহাকাশস্তদৱচ্ছিন্ন এৱ হি।
প্রতিবিম্বাখ্যমপরং দৃশ্যতে ত্রিৱিধং নভঃ॥ **2** ॥

বুদ্ধ্যৱচ্ছিন্নচৈতন্যমেকং পূর্ণমথাপরম্।
আভাসস্ত্ৱপরং বিম্বভূতমেৱং ত্রিধা চিতিঃ॥ **3** ॥

সাভাসবুদ্ধেঃ কর্তৃৎৱমৱিচ্ছিন্নেঽৱিকারিণি।
সাক্ষিণ্যারোপ্যতে ভ্রান্ত্যা জীৱৎৱং চ তথাঽবুধৈঃ॥ **4** ॥

আভাসস্তু মৃষা বুদ্ধিরৱিদ্যাকার্যমুচ্যতে।
অৱিচ্ছিন্নং তু তদ্ব্রহ্ম ৱিচ্ছেদস্তু ৱিকল্পতঃ॥ **5** ॥

অৱিচ্ছিন্নস্য পূর্ণেন একৎৱং প্রতিপাদ্যতে।
তৎৱমস্যাদিৱাক্যৈশ্চ সাভাসস্যাহমস্তথা॥ **6** ॥

ঐক্যজ্ঞানং যদোৎপন্নং মহাৱাক্যেন চাত্মনোঃ।
তদাঽৱিদ্যা স্ৱকার্যৈশ্চ নশ্যত্যেৱ ন সংশযঃ॥ **7** ॥

এতদ্ৱিজ্ঞায মদ্ভক্তো মদ্ভাৱাযোপপদ্যতে
মদ্ভক্তিৱিমুখানাং হি শাস্ত্রগর্তেষু মুহ্যতাম্।
ন জ্ঞানং ন চ মোক্ষঃ স্যাত্তেষাং জন্মশতৈরপি॥ **8** ॥

ইদং রহস্যং হৃদযং মমাত্মনো
    মযৈৱ সাক্ষাৎকথিতং তৱানঘ।
মদ্ভক্তিহীনায শঠায ন ৎৱযা
    দাতৱ্যমৈন্দ্রাদপি রাজ্যতোঽধিকম্॥ **9**॥

॥ শ্রীরামহৃদযং সমাপ্তম্॥